10-3



अथ

॥ वेदांताडिंडिमप्रारंभः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशायनमः ॥ वेदांतडिंडिमास्त
त्वमेकमुद्घोषयंति यत् ॥ आस्तां पुर
स्तात्तत्तेजो दक्षिणामूर्तिसंज्ञितम् ॥ १ ॥
आत्मानात्मा पदार्थौ द्वौ, भोक्तृभोग्य
त्वलक्षणौ ॥ ब्रह्मैवात्मा, न देहादिरिति
वेदांतडिंडिमः ॥ २ ॥ ज्ञानाज्ञाने पदा
र्थौ द्वावात्मनो मुक्तिबंधदौ ॥ ज्ञाना
न्मुक्तिर्निबंधोऽन्यादिति वेदांतडिंडि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मः ॥ ३ ॥ ज्ञातृज्ञेयपदार्थौ द्वौ भास्य भासकलक्षणौ ॥ ज्ञाता ब्रह्म, जगज्ज्ञेय मिति० ॥ ४ ॥ सुखदुःखे पदार्थौ द्वौ, प्रिय विप्रियकारकौ ॥ सुखं ब्रह्म, जगद्दुःख मिति० ॥ ५ ॥ समष्टिव्यष्टिरूपौ द्वौ पदार्थौ सर्वसंमतौ ॥ समष्टिरीश्वरो, व्यष्टिर्जीवो, वेदांतडिंडिमः ॥ ६ ॥ ज्ञा नकर्मपदार्थौ द्वौ, वस्तुकर्त्रात्मतंत्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कौ ॥ ज्ञानान्मोक्षो, न कर्मभ्य, इति वे० ॥ ७ ॥ श्रोतव्याश्राव्यरूपौ द्वौ पदार्थौं सुखदुःखदौ॥श्रोतव्यं ब्रह्म,नैवान्यदिति वे० ॥८॥चिंत्याचिंत्यपदार्थौं द्वौ,विश्रांतिश्रांतिदायकौ ॥ चिंत्यं ब्रह्म,परं नान्यदिति वे० ॥ ९ ॥ ध्येयाध्येये पदार्थौं द्वौ धीसमाध्यसमाधिदौ ॥ ध्यातव्यं ब्रह्म, नैवान्यदिति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वे० ॥ १० ॥ योगिनो भोगिनो वापि त्यागिनो रागिणोऽपि च ॥ ज्ञानान्मो क्षो न संदेह इति वे० ॥ ११ ॥ न वर्णा श्रमसंकेतैर्न कर्मोपासनादिभिः ॥ ब्र ह्मज्ञानं विना मोक्ष इति वे० ॥ १२ ॥ असत्यः सर्वसंसारो रसाभासादिदू षितः ॥ उपेक्ष्यो ब्रह्म विज्ञेयमिति वे० ॥ १३ ॥ वृथाक्रियां वृथालापान्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वृथावादान्मनोरथान् ॥ त्यक्त्वैकं ब्रह्म विज्ञेयमिति वे० ॥ १४ ॥ स्थितो ब्रह्मात्मना जीवो, ब्रह्म जीवात्मना स्थितम् ॥ इति संपश्यतां मुक्तिरिति वेदां० ॥ १५ ॥ जीवो ब्रह्मात्मनाज्ञेयो, ज्ञेयं जीवात्मना परम् ॥ मुक्तिस्तदैत्यविज्ञानमिति वे० ॥ १६ ॥ सर्वात्मना परं ब्रह्म श्रोतुरात्मतया स्थित

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वे० म् ॥ नायासस्तत्वविज्ञप्तावितिवे० ॥ १७ ॥ ऐहिकंचामुष्मिकं च तापांतं कर्मसंचयम् ॥ त्यक्त्वा ब्रह्मैव विज्ञेयमिति वे० ॥ १८ ॥ अद्वैतद्वैतवादौ द्वौ सूक्ष्मस्थूलदशां गतौ ॥ अद्वैतवादान्मोक्षः स्यादिति वे० ॥ १९ ॥ कर्मिणो विनिवर्तंते निवर्तंते ऽपासकाः ॥ ज्ञानिनो न निवर्तंत इति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वे० ॥ २० ॥ परोक्षासत्फलं कर्म, ज्ञा
नं प्रत्यक्षसत्फलम् ॥ ज्ञानमेवाभ्यसे
त्तस्मादिति वे० ॥ २१ ॥ वृथाश्रमोऽयं
विदुषां, वृथाऽयं कर्मिणां श्रमः ॥ यदि न
ब्रह्मविज्ञानमिति वे० ॥ २२ ॥ अलं
यागैरलं योगैरलं भुक्तैरलंधनैः, ॥ पर
स्मिन्ब्रह्मणि ज्ञात इति वेदां० ॥२३॥
अलं वेदैरलं शास्त्रैरलं स्मृतिपुराणकैः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वे० परमात्मनि विज्ञात इति वे० ॥ २४ ॥ हिं०
नर्चा न यजुषार्थोऽस्ति न साम्नार्थो
५ ऽस्ति कश्चन ॥ जातेब्रह्मात्मविज्ञानइ
ति वे० ॥ २५ ॥ कर्माणिचित्तशुद्ध्यर्थ
मैकाग्र्यार्थमुपासना ॥ मोक्षार्थं ब्रह्मवि
ज्ञानमिति वे० ॥ २६ ॥ संचितागामि
कर्माणिदह्यंते ज्ञानवह्निना ॥ प्रारब्धा ५
नुभवान्मोक्ष इति वे० ॥ २७ ॥ नपु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ण्यकर्मणा वृद्धिर्न हानिः पापकर्मणा ॥
नित्यासंगात्मनिष्ठानामिति वे०॥२८॥
बुद्धिपूर्वाबुद्धिपूर्वकृतानां पापकर्मणा
म्॥प्रायश्चित्तमहोज्ञानमिति वे०॥२९॥
दृग्दृश्यौ तौ पदार्थौ द्वौ परस्परविल
क्षणौ ॥ दृग्ब्रह्मदृश्यं माया स्यादिति वे
दां० ॥ ३० ॥ अविद्योपाधिको जीवो
मायोपाधिक ईश्वरः ,॥ मायाविद्यागु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वे० णातीत इति वे० ॥ ३१ ॥ साकारं च निराकारं, निर्गुणं चागुणात्मकम् ॥ तत्त्वं तत्परमं ब्रह्म, इति वे० ॥ ३२ ॥ द्विजत्वं विध्यनुष्ठानाद्विप्रत्वं वेदपाठतः, ॥ ब्राह्मण्यं ब्रह्मविज्ञानादिति वे० ॥ ३३ ॥ सर्वात्मना स्थितं ब्रह्म, सर्वं ब्रह्मात्मना स्थितम् ॥ न कार्यं कारणाद्भिन्नमिति वेदांत० ॥ ३४ ॥ सत्तास्फुरणसौख्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नि भासंते सर्ववस्तुषु ॥ तस्माद्ब्रह्ममयं सर्वमिति वे० ॥ ३५ ॥ अवस्थात्रितयं यस्य क्रीडाभूमितया स्थितम् ॥ तदेव ब्रह्म जानीयादिति वे० ॥ ३६ ॥ यन्नादौ, यच्च नास्त्यंते, तन्मध्ये भातमप्यसत् ॥ अतो मिथ्याजगत्सर्वमिति वे० ॥ ३७ ॥ यदस्त्यादौ, यदस्त्यंते यन्मध्ये भाति, तत्स्वयम् ॥ ब्रह्मैवैकमि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दंसत्यमिति वे० ॥ ३८ ॥ पुरुषार्थत्रया
विष्टाः पुरुषाः पशवोध्रुवम् ॥ मोक्षार्थी
पुरुषः श्रेष्ठ इति वेदांत० ॥३९॥ घटकु
डचादिकं सर्वं मृत्तिकामात्रमेवच ॥ त
थाब्रह्मजगत्सर्वमितिवेदां० ॥ ४० ॥ ष
ण्निहत्यत्रयंहित्वाद्वयं भित्वाखिलाति
गम् ॥ एकंबुद्धाश्रुतेमोक्षमितिवे० ॥४१॥
भित्वा षट्पंचभित्त्वाथभित्त्वाथचतुर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्त्रिकम् ॥ द्वयं हित्वाश्रयेदेकमिति वे०
॥ ४२ ॥ देहो नाहंमहं देही, देहसाक्षी
ति निश्चयात् ॥ जन्ममृत्युप्रहीणोऽसा
विति वे० ॥४३॥ प्राणो नाहंमहं देवः
प्राणसाक्षीति निश्चयात् ॥ क्षुत्पिपासो
पशांतिः स्यादिति वेदां० ॥ ४४ ॥ मनो
नाहंमहं देवो मनःसाक्षीति निश्चयात् ॥
शोकमोहापहानिः स्यादिति वे०॥४५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बुद्धिर्नाहमहं देवो बुद्धिसाक्षीति निश्च
यात् ॥ कर्तृभावनिवृत्तिःस्यादिति वे०
॥ ४६ ॥ नाज्ञानं स्यामहं देवोज्ञानसा
क्षीति निश्चयात् ॥ सर्वानर्थनिवृत्तिः
स्यादिति वे० ॥ ४७ ॥ अहं साक्षीति
यो विद्याद्विविच्यैवं पुनःपुनः ॥ स एव
मुक्तःसो विद्वानिति वे० ॥४८॥ नाहंमा
या न तत्कार्यं न साक्षीपरमोस्म्यहम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति निःसंशयज्ञानान्मुक्तिर्वे० ॥ ४९ ॥
नाहं सर्वमहंसर्वंममसर्वमितिस्फुटम्॥
ज्ञाते तत्त्वे कुतो दुःखमिति वे० ॥ ५० ॥
देहादिपंचकोशस्था या सत्ता प्रतिभा
सते ॥ सा सत्तात्मा न संदेह इति वे०
॥ ५१ ॥ देहादिपंचकोशस्था या स्फूर्ति
रनुभूयते ॥ सा स्फूर्तिरात्मा नैवान्यदि
ति वे० ॥ ५२ ॥ देहादिपंचकोशस्था या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वे० प्रीतिरनुभूयते ॥ सा प्रीतिरात्मा कूट डि०
९ स्थ इति वेदां० ॥ ५३ ॥ व्योमादिपंच
भूतस्था या सत्ता भासते नृणाम् ॥ सा
सत्ता परमं ब्रह्म इति वे० ॥ ५४ ॥ व्यो
मादिपंचभूतस्था या चिदेकानुभूय
ते ॥ सा चिदेव परं ब्रह्म इति वे० ॥ ५५ ॥
व्योमादिपंचभूतस्था या प्रीतिरनुभूय ९
ते ॥ सा प्रीतिरेव ब्रह्म स्यादिति वे०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ ५६ ॥ देहादिकोशगा सत्ता या सा व्योमादिभूतगा ॥ मानाभावान्न तद्भेद इति वे० ॥ ५७ ॥ सच्चिदानंदरूपत्त्वा द्ब्रह्मैवात्मा न संशयः ॥ प्रमाणकोटि संधानादिति वे० ॥ ५८ ॥ न नामरूपे नियते, सर्वत्र व्यभिचारतः ॥ अनाम रूपंसर्वं स्यादिति वे० ॥ ५९ ॥ नजीव ब्रह्मणोभेदः स्फूर्तिरूपेण विद्यते ॥ स्फू

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वे० र्तिरूपेण मानं स्यादिति वे० ॥ ६० ॥ डि०
१० न जीवब्रह्मणोर्भेदः प्रियरूपेण विद्यते॥
प्रियभेदेन मानं स्यादिति वे० ॥ ६१ ॥
न जीवब्रह्मणोर्भेदो नाम्ना रूपेण विद्य
ते ॥ नाम्नो रूपस्य मिथ्यात्वादिति
वेदां० ॥ ६२ ॥ न जीवब्रह्मणोर्भेदः पिंड
ब्रह्मांडभेदतः ॥ व्यष्टेः समष्टेरेकत्वादि १०
ति वे० ॥ ६३ ॥ ब्रह्म सत्यं जगन्मिथ्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जीवो ब्रह्मैव नापरः ॥ जीवन्मुक्तस्तु
ताद्विद्धानिति वे० ॥ ६४ ॥ अनामरूपं
सकलं सन्मयं चिन्मयं परम् ॥ कुतो
भेदः कुत्तो बंधः इति वे० ॥ ६५ ॥ न
तत्त्वात्कथ्यते लोको नामाद्यैर्व्यभिचा
रतः॥ बटुः कुलट इत्याद्यैरिति वे० ६६॥
नामरूपात्मकं विश्वमिंद्रजालं विदुर्बु
धाः ॥ अनामत्वादयुक्तत्वादिति वे०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वे० ॥ ६७ ॥ अभेददर्शनं मोक्षःसंसारो भेद डिं०
११ दर्शनः ॥ सर्ववेदांतासिद्धांत इति वे०
॥ ६८ ॥ न मताभिनिवेशित्वान्न भाषा
वेशमात्रतः ॥ मुक्तिर्विनात्मविज्ञानादि
ति वे० ॥ ६९ ॥ नकाम्यप्रतिषिद्धाभिः
क्रियाभिर्मोक्षवासना॥ईश्वरानुग्रहात्सा
स्यादितिवे०॥७०॥अविज्ञातेजन्म नष्टं ११
विज्ञातेजन्मसार्थकम्॥ज्ञातुरात्मा न दू

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रेस्यादितिवे० ॥ ७१ ॥ दशमस्यपारज्ञा
नेनायासोस्ति यथा तथा ॥ स्वस्य ब्रह्मा
त्मविज्ञान इति वेदां० ॥ ७२ ॥ उपे
क्ष्यौपाधिकान्दोषान्गृह्यन्ते विषया
यथा ॥ उपेक्ष्य दृश्यं यद्ब्रह्म इति वेदां०
॥ ७३ ॥ सुखमल्पं बहुक्लेशोविषयग्रा
हिणांनृणाम् ॥ अनंतं (सुखं) ब्रह्मनिष्ठाना
मिति वे० ॥ ७४ ॥ धनैर्वा धनदैः पुत्रैर्दा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वे० रागारसहोदरैः ॥ ध्रुवं प्राणहरैर्दुखामि डिं०
१२ ति वे० ॥ ७५ ॥ सुप्तेरुत्थाय सुख्यं तं ब्रह्मैकं प्रविचिंत्यताम् ॥ नातिदूरे नृणां मृत्युरिति वेदां० ॥ ७६ ॥ पंचा नामपि कोशानां मायानर्थव्ययोचि ता ॥ तत्साक्षी ब्रह्मविज्ञानमिति वे० ॥ ७७ ॥ दशमत्त्वपरिज्ञाने नवज्ञ १२ स्य यथासुखम् ॥ तथा जीवस्यसंप्रा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तिरिति वे० ॥ ७८ ॥ नवभ्योस्तिपरं प्रत्यङ्नव वेद परं परम् ॥ तद्विज्ञानाद्ध वेत्तुर्या मुक्तिर्वेदां० ॥ ७९ ॥ नवाभासा नवज्ञात्वान्नवोपाधीन्नवात्मना ॥ मिथ्याज्ञात्वावशिष्टे तु मौनं वे० ॥ ८० ॥ परमे ब्रह्मणि स्वस्मिन्प्रविलाप्याखिलं जगत् ॥ गायन्नद्वैतमात्मानमास्ते वे० ॥ ८१ ॥ प्रतिलोमानुलोभ्यां मा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विश्वारोपापवादयोः ॥ चिंतने शिष्यते तत्वमिति वे० ॥८२॥ नामरूपाभिमानः स्यात्संसारः सर्वदेहिनाम् ॥ सच्चिदानंददृष्टिस्स्यादिति वे० ॥८३॥ सच्चिदानंदसत्यत्वे, मिथ्यात्वे नामरूपयोः॥ विज्ञाते किमिदंज्ञेयमिति वे० ८४॥ सालंबनंनिरालंबंसर्वालंबावलंबितम् ॥ आलंबेनाखिलालंबमिति वेदां० ॥८५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नकुर्यान्न विजानीयात्सर्वंब्रह्मेत्यनुस्मरन् ॥ यथासुखं तथा तिष्ठेदिति वेदां० ॥ ८६ ॥ स्वकर्मपाशवशगः प्राज्ञोऽन्यो वा जनो ध्रुवम् ॥ प्राज्ञः सुखं नयेत्कालमिति वे०॥८७ ॥ न विद्वान्संतपेच्चित्तं करणाकरणो ध्रुवम् ॥ सर्वमात्मेति विज्ञानादिति वे० ॥ ८८ ॥ नैवाभासंस्पृशेत्कर्म मिथ्योपाधिमपि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वे० स्वयम् ॥ कुतोधिष्ठानमत्यच्छामिति डिं०
१४ वेदां० ॥ ८९ ॥ अहोऽस्माकमलं मो
हैरात्मा ब्रह्मेति निर्भयम् ॥ श्रुतिभे
रीरवोऽद्यापि श्रूयते श्रुतिरंजनः ॥९०॥
वेदांतभेरीझंकारः प्रतिवादिभयंकरः
॥ श्रूयतां ब्राह्मणैः श्रीमद्दक्षिणामूर्त्यनु
ग्रहात् ॥ ९१ ॥ इति श्रीवेदांतडिंडिमः १४
परिसमाप्तः ॥ शुभम् ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इदं पुस्तकं मुम्बय्यां खेमराज श्रीकृष्णदास श्रेष्ठिना
स्वकीये " श्रीवेङ्कटेश्वर " (स्टीम्)
यन्त्रागारे मुद्रयित्त्वा प्रकाशितम् ।
संवत् १९६१, शके १८२६.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जाहि-

क्रय्यपुस्तकें।

नाम.	की. रु. आ.
श्रीमद्भगवद्गीता सान्वयव्रजभाषा दोहासहित	१-४
गीतामृततरंगिणी भाषाटीका (रघुनाथप्रसादकृत) अक्षरबड़ा	१-०
गीतामृततरंगिणी भाषाटीका पाकिटबुक	०-१२
श्रीरामगीता मूल	०-२
श्रीरामगीता भाषाटीका-पदमकाशिकाअनुवादसमुच्चय और विषमपदीके सहित	०-८
श्रीमद्भगवद्गीतापंचरत्नअक्षरमोठागुटकारेशमी	१-०
पंचरत्न अक्षरबड़ा खुलापना छोटीसंची	१-८
पंचरत्न अक्षरबड़ा कंघीसंची खुला	१-०
पंचरत्न भाषाटीका	२-०
गीता श्रीधरीटीकासहित	१-०
गीता बड़े अक्षरकी १६ पेजीगुटका....	०-१२
श्रीमद्भगवद्गीता श्रीमधुसूदनटीकासमेत	२-८

पता-खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" स्टीम् प्रेस-बंबई.

रात-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति

॥ वेदांतडिंडिमः परिसमाप्तः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri